# MT - 172

**2013 .... .... 1200** **Seat No.** | | | | | | | |

**MT - 172 - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM I - PAPER - II**

**Time : 3 Hours** **(Pages 7)** **Max. Marks : 80**

**Q.I. (A) Translate *any three* of the following passages into English : 15**

(i) तथेत्युक्त्वा लेरसिया ताभ्यां भ्रातृभ्यां सह कुटीं गत्वा ताभ्यां सह मोदमानः रात्रिमयापयत्। ताभ्यां साकं रूक्षमन्नमपि तेन सानन्दं भक्षितम् । प्रत्युषसि तेनात्मनः सत्यरूपं प्रकटीकृत्य आत्मपरिचयस्तयोः कारितः । अचिरादेवैषा वार्ता ग्रामे प्रसृता । सर्वे ग्रामवासिनः चकिता लज्जिताश्चाभवन् । एष महाजनो ग्रामागतोऽपि नास्माभिर्विज्ञातः तेन सह शिष्टसम्मतो वा मानुषो आचारोऽपि न कृतः इति विचारेण ते खिन्ना जाताः ।

(ii) एकस्मिन् दिने तस्मै अनन्तभट्टवैद्यस्य विषये केनापि कथितम् । ततस्तमानेतुं तेन धनिकेन सत्वरं सेवकः प्रेषितः । किन्तु सेवकेन आनीते सन्देशे लिखितमासीत्, 'भवन्तमुपचरितुं सानन्दमिच्छामि । तथापि मया मम नियमानां पालनमपेक्ष्यते । चिकित्सामभिलषन् रुग्णः स्वयमेव मम समीपे आगच्छतु । कृपया सूर्योदयादनन्तरं पद्भ्यामेव आगच्छतु ।'

(iii) तान् मार्गाद् दूरीकर्तुं स्वामिना पदप्रहारस्याभिनयः कृतः तदा ते तं दंष्टुमधावन् । कठिनोऽयं प्रसङ्गः इति मत्वा भीतः सः त्वरया पलायितुमारभत । वानरा अपि तम् अन्वधावन् । संभ्रान्तं स्वामिनं पलायमानं दृष्ट्वा मार्गे आसीनः कोऽपि याचकः उच्चैरभाषत, ''अरे संन्यासिन्, अलं पलायनेन । निर्भयतया तान् वानरान् अभिमुखो भव । तेन ते वानराः भीताः न त्वां पीडयिष्यन्ति ।

(iv) प्रागैतिहासिककालतो विविधेषु संशोधनेषु अन्तर्जालमिति सर्वश्रेष्ठाविष्कारो मानवस्य । अद्ययावन्महाक्रान्तिरेषा । 'मोडेम्' नाम एकं सहायकं लघूपकरणमस्ति । तद् दूरसञ्चारतन्तुभिः सङ्गणकं संयोज्य अन्तर्जालस्य संरचना भवति । सङ्गणकानां लघुगुरुजालकानां मिथः सम्बन्धेन विश्वव्यापि यज्जालं भवति, तदेव सङ्गणकजालान्तरिक्षं खलु । अन्तर्जालमिति ज्ञानप्राप्तेरतिद्रुतगतिमार्ग एव ।

(v) अदितिः - आचार्ये नमो नमः । नाट्यविषयिणी जिज्ञासा भवत्याः दर्शनार्थं मां प्रेरयति।
आचार्या - किं कारणं ते जिज्ञासायाः ?
अदितिः - अस्माकं शालया राज्यनाट्यस्पर्धायाः कृते संस्कृतनाट्यस्य प्रयोगः करणीयः इति सुनिश्चितम् । झाशीराज्ञी मया अभिनेतव्या लक्ष्मीबाई । वीररसप्रधानमेतन्नाटकमिति दिग्दर्शकेन कथितम् ।

**Q.I. (B) Translate *any two* groups of verses into English :** **8**

**Group I**

(i) ज्ञानेन पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः ।
ज्ञानस्य मत्वेति गुणान् कदाचिज्ज्ञानं न मुञ्चन्ति महानुभावाः ।।

(ii) अव्यक्तं व्यापकं नित्यं गुणातीतं चिदात्मकम् ।
व्यक्तस्य कारणं वन्दे व्यक्ताव्यक्तं तमीश्वरम् ।।

**Group II**

(i) आसीत् कोऽपि प्रतिष्ठाने तपोदत्त इति द्विजः ।
स पित्रा क्लेश्यमानोऽपि विद्यां नाध्यैत शैशवे ।।

(ii) रागे द्वेषे च माने च द्रोहे पापे च कर्मणि ।
अप्रिये चैव कर्तव्ये चिरकारी प्रशस्यते ।।

**Group III**

(i) वंशेऽथ तस्मिन् किल फारुकेन्द्रो बभूव राजा मलिकाभिधानः ।
तस्याभवत् सूनुरुदारचेताः कुलावतंसो गजनीनरेशः ।।

(ii) यथा छायातपौ नित्यं सुसम्बद्धौ परस्परम् ।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ।।

**Group IV**

(i) अणुशास्त्रे वा विज्ञाने वा
सङ्गणकीये पोखरणे वा
ऐन्द्रजालिकैराधुनिकैर्यत् प्रावीण्यं प्राप्तम्
ध्वजमध्ये तद् यशो धवलतामाप्त्वा सङ्कलितम् ।
ध्वजमध्यस्थो धवलिमा च मामुत्साहयतेऽयम्
भावोत्कटता मुखरयते मां 'जयतु च विज्ञानम्' ।।

**Q.II. (A) Answer *any two* questions in English from group I and II each :** **8**

**Group I**

(i) How did district collector Otto Rothfield bring a turning point in विनायक's life ?

(ii) What message did सोमशर्मा's servant bring from the doctor ?
(iii) What are the features of केवलदेव national park ?

**Group II**

(i) What trick did इन्द्र use to prohibit तपोदत्त from taking an impulsive decision?
(ii) How is the friendship of virtuous people ?
(iii) According to the poem नमामि राष्ट्रध्वजम् from what has the national flag got its green colour ?

**Q.II. (B) Complete *any two* verses of the following : 4**

(i) गजाननं ................ पङ्कजम् ।।
(ii) तन्मूलं ................ नाम ।।
(iii) मुहूर्तं ................ मृदुः ।।
(iv) अहो ................ ददाति ।।

**Q.II. (C) Complete *any one* verse based on a metre : 2**

(i) गीतिः (ii) इन्द्रवज्रा

**Q.III. (A) Write 5 sentences in Sanskrit on *any one* topic given below: 5**

(i) रक्षाबन्धनम् (ii) वृत्तपत्राणि (iii) गगनम्

**OR**

**Translate *any five* sentences in Sanskrit :**

(i) Justice should punish the guilty.
(ii) An elephant walks very slowly.
(iii) The birds fly in the sky.
(iv) These flower ladden trees look beautiful.
(v) Peacock-feather looks beautiful on the head of Lord Krishna.
(vi) On 5th sep. teacher's day is celebrated.
(vii) Delhi is the capital of India.
(viii) Clouds rain.

**Q.IV. (A) Rewrite the following sentences according to the order : 5**

(i) परं का नाम ऊर्जा ? कानि तस्याः रूपाणि ?
(ii) पारम्परिकाणि अपारम्परिकाणि च तस्याः साधनानि ।

(iii) परं कानि तस्याः साधनानि ?

(iv) तद् द्रवरूपेन्धनम् अपरिष्कृतं तैलमित्युच्यते ।

(v) कृष्णाङ्गाराः, खनितैलः, नैसर्गिकवायुश्चेति पारम्परिकाणि ।

**OR**

**(B) Answer *any five* question in Sanskrit :**

(i) सोमशर्मा कुत्र निद्राधीनः जातः ?

(ii) कानि पारम्परिकाणि ऊर्जास्रोतांसि ?

(iii) सासवणेग्रामः कुत्र वर्तते ?

(iv) कः खगविशेषः नामशेषतां गतः ?

(v) कस्य धैर्यगुणः प्रमार्ष्टुं न शक्यते ?

(vi) सन्तः कीदृशा वर्तन्ते ?

(vii) राष्ट्रध्वजे हरितत्वं कया पल्लवितम् ?

(viii) भूपालचूडामणिः कः ?

**Q.V. (A) Translate *any one* unseen passage / dialogue into English : 5**

(i) एकदा दुर्बुद्धिः आनन्दमग्नं सुबुद्धिम् अपृच्छत्, ''भवतः आनन्दस्य शान्तेश्च किं रहस्यम् ?'' सुबुद्धिः उवाच, ''मित्र । मम चत्वारः अङ्गरक्षकाः सन्ति । प्रथमं तु सत्यं यत् माम् अपराधात् सर्वदा रक्षति । द्वितीयः स्नेहः, अहं सर्वान् कर्मचारिणः पुत्रवत् मन्ये । तृतीयः न्यायः, यः मामन्यायात् रक्षति । चतुर्थः त्यागः, मां दानाय प्रेरयति । अतः एतेषां सहायतया अहं सर्वदा आनन्देन जीवामि लोकहितं च करोमि इति ।'' दुर्बुद्धिः श्रद्धया तस्य चरणयोः अपतत् ।

(ii) बिभीषणः - प्रसीदतु महाराजः । महाराजस्य हितार्थं किम् अपि वक्तुम् इच्छामि ।

रावणः - उच्यताम् ।

बिभीषणः - सर्वथा राक्षसकुलविनाशः अभ्यागत इति मन्ये ।

रावणः - केन कारणेन ?

बिभीषणः - महाराजस्य विरुद्धाचरणेन ?

रावणः - किं मम विरुद्धाचरणम् ?

बिभीषणः - सीतापहरणम् एव ।

रावणः - सीतापहरणेन कः दोषः ।

बिभीषणः - अधर्मः । तेन च राक्षसकुलविनाशः ।

(iii) दूतः – देव ! कश्चिद् दरिद्रः भवतो दर्शनप्रार्थी ।

राजा – त्वरितं सादरमानय तम् । (दरिद्रः प्रविशति राजा पृच्छति) कुतः आगच्छसि भोः ?

दरिद्रः – कैलासाद् आगच्छामि देव ।

राजा – ब्रूहि अपि स भगवान् शिवः सकुशलः ।
दरिद्रः – तस्य कुशलतायाः प्रश्न एव न उदेति । स तु दिवंगतः ।
राजा – किं दिवंगतः ? कथम् । अस्माभिः नैव श्रुतम् ।

**Q.V. (B) Translate *any one* group of verses into English :** **4**

**Group I**

(i) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।

(ii) जननी जन्मभूमिश्च जाह्नवी च जनार्दनः ।
जनकः पञ्चमश्चैव जकाराः पञ्च पूजिताः ।।

**Group II**

(i) चेतो भग्नं यदि किल भवेत्सज्जनानां कदाचित्
निःसन्देहं सहजमचिराद्धेमवद्युज्यते तत् ।
छिन्नो भिन्नो घटति न यथा कुम्भकारस्य कुम्भः
दुर्वृत्तानामुपहतमनो युज्यते नैव नैव ।।

**Group III**

(i) हृदयानि सतामेव कठिनानीति मे मतिः ।
खलवाग्विशिखैस्तीक्ष्णैर्भिद्यन्ते न मनागपि ।।

(ii) ईर्ष्यो घृणी त्वसंतुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ।।

**Q.VI. Answer in English : (*Any two*)** **4**

(i) How has sage मार्कंडेय described the significance of colours?
(ii) How are नवरसs important even in painting ?
(iii) How did डॉ. बाबासाहेब आंबेडकर display his proficiency in संस्कृत ?
(iv) How did Sanskrit literature help in preparing the draft of the Indian Constitution?

**Q.VII. Complete the story.** **5**

अस्ति हेमाङ्गदे देशे राजपुरं नाम ________ । तत्र जीवंधरो नाम कोऽपि ________ राजपुत्रोऽभवत् । एकदा प्रवृत्ते मधुमासे जीवंधरकुमारः ________ सह जलक्रीडां कर्तुं

नदीं गतः । तत्र आसन्नमरणः कोऽपि _________ तस्य दृष्टिमागतः । केनापि _________ भृशं ताडितः सः रुधिरप्लावितः तत्र पतितः करुणं आक्रोशति स्म । भूतानुकम्पी राजकुमारः बहु दुःखितः ।

( दयाशीलो, नगरम्, निर्दयेन, कुक्कुरः, वयस्यैः )

**OR**

**Make *any five* sentences in Sanskrit by using indeclinables / governing cases :**

| | | |
|---|---|---|
| (i) अलम् | (ii) उपरि | (iii) बहिः |
| (iv) नमः | (v) स्निह् | (vi) कथ् |
| (vii) प्र + विश् | (viii) गम् | |

**Q.VIII. Solve *any five* sub-questions from the following : 15**

**(A) Recognize *any three* of the following forms :**

| | | |
|---|---|---|
| (i) स्रोतांसि | (ii) सर्वैः | (iii) निर्मातुम् |
| (iv) पृष्टवान् | (v) जाने | |

**(B) Dissolve and name the compounds : (*Any three*)**

| | | |
|---|---|---|
| (i) महाप्रयासः | (ii) अस्वास्थ्यम् | (iii) सादरम् |
| (iv) जनप्रमुखम् | (v) शान्तिसुखयोः | |

**(C) Dissolve sandhi as following : (*Any three*)**

| | | |
|---|---|---|
| (i) विद्युन्निर्मीयते | (ii) ददतीति | (iii) अतस्तेन |
| (iv) यतोऽस्य | (v) देशान्तरादपि | |

**(D) Give Sanskrit antonym of the following words : (*Any three*)**

| | | |
|---|---|---|
| (i) शनैः | (ii) मोदः | (iii) निकटे |
| (iv) शीतम् | (v) पुरातनम् | |

**(E) Complete *any three* of the following sentences by choosing the suitable alternative given in the brackets :**

(i) रुग्णः स्वयमेव ................ समीपे आगच्छतु । (मम, मह्यं, मां)

(ii) ........ जैविकवायुः प्रभवति । ( एरण्डबीजात् , इक्षुदण्डावशेषात् , अवकरात् )

(iii) ............ निकषा एवाध्युषितं रम्यस्थलम् । ( समुद्रस्य, समुद्रं, समुद्रात् )

(iv) ................ खगा आगत्य हिमसमये वसन्ति । (नैके, नैकाः, नैकैः)

(v) ट्रॉम्बेतारापुरस्थौ .............. अणुविद्युत्प्रकल्पौ प्रसिद्धौ । ( द्वौ , द्वयोः , द्वाभ्याम् )

**(F) Do as directed : (*Any three*)**

(i) राममन्दिरेऽनेन छत्रपतिशिवरायस्य चित्रं विलेखितम् । (Change the voice)

(ii) सोमशर्मणा पृष्टे सति अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत् ।
(Remove absolute locative)

(iii) राष्ट्रध्वजः मां कीर्तिकथाः स्मारयते । (Remove Causal construction)

(iv) भवान् अस्माकं जीर्णकुटीम् आगच्छतु । (Use 'त्वम्' instead of 'भवान्')

(v) स गङ्गातटं ययौ ।
(Use imperfect past tense form of root या in place of perfect past tense.)

***Best Of Luck***

# MT - 172

**2013 .... .... 1200**

MT - 172 - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM I - PAPER - II

**Time : 3 Hours** **Preliminary Model Answer Paper** **Max. Marks : 80**

| | | |
|---|---|---|
| **A.I.** | **(A) Translate *any three* of the following passages into English :** | |
| (i) | Having said 'alright', Lerasiya went to the hutment along with the two brothers and happily passed (spent) the night with them. He merrily consumed even dry food with them. Early in the morning, disclosing his real identity introduced himself to them. Immediately, (In a short while) this news spread throughout the village. All the villagers were astonished and ashamed. They were dejected thinking that even after this great person arrived to the village, we did not recognize him or even show courtesy or humane behaviour towards him. | **5** |
| (ii) | One day he was told about physician अनन्तभट्ट by someone. Then, in order to bring him, a servant was sent immediately by that rich man. But it was written in the message brought by the servant, "I happily wish to treat the respected one. Yet, I expect the compliance of my rules. A patient desiring treatment may himself come to me. After sunrise, please come on foot (walk) itself. | **5** |
| (iii) | In order to ward them off on the road when he pretended to bang his foot hard on the ground, then they ran to bite him. Thinking that, 'This is a difficult situation', he started running quickly. Even the monkeys chased him. Seeing the confused Swami running, a beggar who was sitting on the way, said loudly, "O Swami, enough of running (Do not run). Face the monkeys fearlessly. Due to that, the monkeys would be frightened and would not trouble you." | **5** |
| (iv) | Among all the inventions of men, since pre-historic times, the invention of internet is the greatest one. This is the greatest | **5** |

| | | |
|---|---|---|
| | revolution till date. There is small helping device called 'Modem'. Internet connection is done by connecting it with telephone wires and the computer. The world-wide network that exists due to the mutual connection of small and big networks of computers, is indeed the Cyber-space. Internet is indeed the Super Highway of acquiring knowledge. | |
| (v) | Aditi : O teacher, salutations (to you). Curiosity about drama inspires me to visit you.<br>Teacher : What is the reason of your curiosity?<br>Aditi : It has been decided by our school that we should perform a Sanskrit play for the State-level Drama competition. I am to enact the role of लक्ष्मीबाई, the Queen of झाँसी. It has been told by the director that this drama has heroism as the primary रस (sentiment). | **5** |
| **A.I.** | **(B) Translate *any two* groups of verses into English :**<br>**Group I** | |
| (i) | The achievement of all objectives / aims (four पुरुषार्थs) of men is through knowledge alone, without (apart from) knowledge there is no achievement of any purpose. Hence, having realized these virtues of knowledge, the wise ones (leaders) never give up / reject knowledge. | **2** |
| (ii) | I salute that Lord, who is invisible, all-pervading, eternal, beyond all attributes, sentient, who is the cause of all that is manifest and that is not completely manifest by that which is manifest. | **2** |
| | **Group II** | |
| (i) | There was a certain brahmin named तपोदत्त in Paithan (previously called प्रतिष्ठान). Even though he was troubled (pestered) by his father (to attend school) he did not take education (study) in childhood. | **2** |

| | | |
|---|---|---|
| (ii) | While being angry, feeling hatred, feeling proud, making enmity while committing a sin, as well as while the doing an unpleasant, he who takes a while (delays) is appreciated.<br>**Explanation :** In case of anger, hatred, while committing a sinful or unpleasant act, the one who is not instantaneous, who thinks for a while and delays the action, enjoys appreciation and praise in the end and helps avoid undesirable effect. | **2** |
| | **Group III** | |
| (i) | In that dynasty, was born the head of Farooqi family, a king named Malik. He had a son, the ruler of Gazni, who was generous and an adornment of the dynasty. | **2** |
| (ii) | Just as sunshine and shade are interdependent, likewise, the subject and the object are mutually connected.<br>**Explanation :** There is a cause for every effect. | **2** |
| | **Group IV** | |
| (i) | The proficiency/skill acquired in nuclear science or technology or computers or at पोखरण by the modern magicians (scientists) has accumulated on the flag by attaining white colour. This whiteness in the middle of the flag enthuses/energizes me and the intense emotion makes me say “जय विज्ञान” (may science triumph). | **4** |
| **A.II.** | **(A) Answer *any two* questions in English from group I and II each :** | |
| | **Group I** | |
| (i) | Once respected करमरकर drew the picture of king शिवाजी at the temple of Lord श्रीराम in village. At that time, district collector of अलिबाग, Otto Rothfield arrived there for inspection of village. He was very impressed by seeing the picture. He enrolled respected विनायक in J.J. school of arts in Mumbai. In school, respected विनायक stood first due to his genius. | **2** |

| | | |
|---|---|---|
| (ii) | सोमशर्मा, a rich merchant, was extremely busy with work due to several business affairs. Eventually he started experiencing health problems. Many doctors were unable to cure him. Finally upon somebody's advice, he sent a servant to get the well-known doctor named अनन्तभट्ट. अनन्तभट्ट sent the servant back with a message stating, "I would be pleased to treat you, but I expect strict adherence to my rules. The patient who wishes to be treated must himself come to me." | **2** |
| (iii) | केवलदेव national park is at भरतपुर. It is a bird sanctuary. Birds' protection is necessary as decreasing number of birds is a serious concern. केवलदेव national park has created different habitats like dry grasslands, wetlands for different species of birds. There are also huge trees for birds. Three hundred sixty six bird species are found in this sanctuary. There is a large number of migratory birds along with its own resident birds. Across the countries, many tourists as well as ornithologists visit केवलदेव national park. | **2** |
| | **Group II** | |
| (i) | तपोदत्त, a young brahmin boy, did not study during childhood and grew up to be criticized for his illiteracy. He then decided to perform severe penance on the banks of river गङ्गा for achieving knowledge. Lord इन्द्र was amazed at this impulsive decision and having decided to discourage तपोदत्त from penance, he arrived there in the disguise of a brahmin. While तपोदत्त was looking at him, he started tirelessly casting sand from the banks of the river into the water. | **2** |
| (ii) | The poet says that the friendship of virtuous people is short in the beginning but great later on. This means, the friendship of virtuous ones may not bear immediate results but will surely be beneficial in the long run. Hence, one should always accompany virtuous people. | **2** |

| | | |
|---|---|---|
| (iii) | The earth which has seeds of grain in her womb is sprinkled by the sweat and blood of the farmers. This earth bears the fruits due to hard work of farmers. It was due to this that the green revolution took place in India. Our nation became self-sufficient in grain production. This has appeared in the green colour of the flag. This green prosperity was possible due to farmers. Therefore, poetess salutes them by saying 'जय किसान'. | **2** |
| **A.II.** | **(B) Complete *any two* verses of the following :** | |
| (i) | गजाननं **भूतगणादिसेवितं कपित्थजम्बूफलसारभक्षितम् ।**<br>**उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपाद**पङ्कजम् ॥ | **2** |
| (ii) | तन्मूलं **गुरुतायास्तत्सौख्यं तद्यशस्तदौर्जित्यम् ।**<br>**तत्सौभाग्यं पुंसां यदेतदप्रार्थनं** नाम ॥ | **2** |
| (iii) | मुहूर्तं **ज्वलितं श्रेयो न च धूमायितं चिरम् ।**<br>**मा ह स्म कस्यचिद् गेहे जनि राज्ञः खरो** मृदुः ॥ | **2** |
| (iv) | अहो **महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।**<br>**यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं** ददाति ॥ | **2** |
| **A.II.** | **(C) Complete *any one* verse based on a metre :** | |
| (i) | **गीतिः** - वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।<br>न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥ | **2** |
| (ii) | **इन्द्रवज्रा** - गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः क्वापि कवीश्वराणाम् ।<br>रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः ॥ | **2** |
| **A.III.** | **(A) Write 5 sentences in Sanskrit on *any one* topic given below:** | |
| (i) | **रक्षाबन्धनम्**<br>श्रावणपौर्णिमायां रक्षाबन्धनमहोत्सवः सम्पद्यते । एतस्मिन् दिने भगिनी बन्धोः करे रक्षासूत्रं बध्नाति । बन्धुः भगिन्याः रक्षणकर्ता अस्ति । एतत् स्नेहसूत्रमयं बन्धनं दृढं भवति रक्षासूत्रबन्धनेन। राज्ञी पद्मावती मुगलसम्राजं हुमायुनं रक्षाबन्धनदिने रक्षासूत्रं प्रेषितवती । तेन प्रेरितः सः स्वसैन्यं रजपूतानां साहाय्यार्थं प्रेषितवान् । एषा कथा तु प्रसिद्धा । 'सबलाः | **5** |

दुर्बलान् रक्षन्तु, सर्वेषां मङ्गलं भवतु' इति भारतीयाः एतेन रक्षाबन्धनेन सूचयन्ति । एषः एव एतस्य उत्सवस्य विशेषः ।

(ii) **वृत्तपत्राणि** 5

लोकसत्ताकपद्धतौ वृत्तपत्राणां स्थानं महत्त्वपूर्णम् । वृत्तपत्रैः मानवस्य सकलं जीवनं व्यापृतम् । प्रातःकाले यदि अस्य लोकमित्रस्य दर्शनं न भवति तर्हि जनाः व्याकुलाः भवन्ति। अज्ञानस्य, अन्यायस्य, मिथ्याज्ञानस्य च निवारणाय वृत्तपत्राणि सदैव सिद्धानि । सत्यप्रचारः अपि वृत्तपत्राणाम् उद्दिष्टम् । वृत्तपत्राणां समाजप्रबोधनस्य कार्यम् अतीव असाधारणं महत्त्वपूर्णं च । आधुनिके काले वृत्तपत्राणि जनमतं घटयन्ति विघटयन्ति वा । दूरदर्शनात् वृत्तपत्रमहिमा प्रभावशाली खलु ।

(iii) **गगनम्** 5

धरायाः छत्रं नाम गगनमण्डलम् । एतद् सागरः इव विशालम् । आकाशस्य वर्णः नीलः । सूर्यः, चन्द्रः तारकाश्च आकाशस्य भूषणानि । प्रभाते गगनम् अतीव शोभायमानं दृश्यते । तथैव रात्रौ चन्द्रतारादिभिः मनोहारि दृश्यते । वर्षासमये कृष्णमेघैः आच्छादितं आकाशं न प्रकाशते ।

**OR**

**Translate *any five* sentences in Sanskrit :**

(i) न्यायः अपराधिनं दण्डयेत् / दण्डयेत । 1
(ii) गजः अतीव शनैः / मन्दं चलति । 1
(iii) खगाः गगने डयन्ते । 1
(iv) एते पुष्पिताः वृक्षाः रमणीयाः दृश्यन्ते । 1
(v) श्रीकृष्णस्य मस्तके / मूर्ध्नि मयूरपिच्छः राजते । 1
(vi) सप्टेम्बरमासस्य पञ्चमे दिने शिक्षकदिनम् सम्पद्यते / सभाजयति । 1
(vii) देहली भारतस्य राजधानी अस्ति । 1
(viii) मेघाः वर्षन्ति । 1

**A.IV. (A) Rewrite the following sentences according to the order :**

(i) परं का नाम ऊर्जा ? कानि तस्याः रूपाणि ? 1
(ii) परं कानि तस्याः साधनानि ? 1
(iii) पारम्परिकाणि अपारम्परिकाणि च तस्याः साधनानि । 1
(iv) कृष्णाङ्गाराः, खनितैलः, नैसर्गिकवायुश्चेति पारम्परिकाणि । 1
(v) तद् द्रवरूपेन्धनम् अपरिष्कृतं तैलमित्युच्यते । 1

**OR**

| | | |
|---|---|---|
| | **Answer *any five* question in Sanskrit :** | |
| (i) | सोमशर्मा **दोलायां** निद्राधीनः जातः । | **1** |
| (ii) | **कृष्णाङ्गाराः, खनितैलं, नैसर्गिकवायुः च एतानि** पारम्परिकाणि ऊर्जास्रोतांसि । | **1** |
| (iii) | **कोंकणप्रदेशे रायगडजनपदे** सासवणेग्रामः वर्तते । | **1** |
| (iv) | **'क्रौञ्च'** नाम खगविशेषः नामशेषतां गतः । | **1** |
| (v) | **कदर्थितस्य** धैर्यगुणः प्रमार्ष्टुं न शक्यते । | **1** |
| (vi) | सन्तः **सुकृतपादपाः इव** वर्तन्ते । | **1** |
| (vii) | राष्ट्रध्वजे हरितत्वं **हरितक्रान्त्या** पल्लवितम् । | **1** |
| (viii) | **श्रीमान् एदलभूपतिः** भूपालचूडामणिः आसीत् । | **1** |
| **A.V.** | **(A) Translate *any one* unseen passage / dialogue into English :** | |
| (i) | Once, stupidity asked wisdom, who was engrossed in joy, "what is the secret of your joy and peace?" Wisdom said, "Friend, I have four bodyguards. The first one is, indeed, 'truth', which always protects me from crimes. Second one is 'affection'; I treat all employees like my sons. The third one is 'justice' which protects me from injustice. The fourth one is 'sacrifice' that motivates me towards charity. Hence, with the assistance of these, I always live happily, and do benevolance (social welfare)." Stupidity fell at his feet with respect. | **5** |
| (ii) | बिभीषण - May his Majesty be pleased ! I desire to say something for the benefit of the King.<br>रावण - May it be said.<br>बिभीषण - I think that the complete destruction of the demon- family has almost come.<br>रावण - Due to what reason ?<br>बिभीषण - Due to the improper behaviour of his Majesty.<br>रावण - What is my improper behaviour ?<br>बिभीषण - The abduction of Seeta itself.<br>रावण - What is the fault with the abduction of Seeta ?<br>बिभीषण - Unrighteousness. And due to that the destruction of the demon-family. | **5** |

| | | |
|---|---|---|
| (iii) | Messenger – O Lord! Some poor person wishes to see you.<br>King – Quickly bring him respectfully. (The poor person enters, the king asks) Oh where do you come from?<br>Poor – O Lord ! I have come from Kailas.<br>King – Say is Lord Shiva well?<br>Poor – The question of his well-being does not arise at all. He has gone to heaven.<br>King – What? Gone to heaven (died?) How? It hasn't been heard by us. | **5** |
| **A.V.** | **(B) Translate *any one* group of verses into English :**<br>**Group I** | |
| (i) | Where the women are worshipped (revered), there the Gods rejoice. But where they are not honoured, all actions become fruitless there. | **2** |
| (ii) | Mother (जननी), Motherland (जन्मभूमि), River Ganga (जाह्नवी), Lord Vishnu (जनार्दन) and the fifth one - the father (जनक), these five things beginning with ज (जकारs) are worshipped. | **2** |
| | **Group II** | |
| (i) | The heart of the virtuous, if ever broken, is undoubtedly easily joint like gold at once. The broken heart of the wicked is never put together, just like the potter's broken and shattered earthen pot which is never joint.<br>**Explanation** : Good people though hurt do not keep grudges for long. They forgive and forget soon. Even in the worst of circumstances the virtuous ones will be helpful to others. The wicked, however hold on to the grudges and become revengeful and are never helpful to anybody. | **4** |
| | **Group III** | |
| (i) | I feel that the hearts of the virtuous alone are extremely tough; they are not broken (pierced/hurt) even a little, by even the sharpest of the oral arrows (criticisms) of the wicked. | **2** |

| | | |
|---|---|---|
| (ii) | These six suffer grief the envious, abusive, dissatisfied angry, always suspicious and the one who always lives dependent on others. | 2 |
| **7A.VI.** | **Answer in English : (*Any two*)** | |
| (i) | Colours are the integral part of any drawing. The expertise of a painter lies in the application of different colours. White, red, yellow, black and green are five important primary colours. Serval colours can be created by the combination of two-three colours. Among them black and white are very important for mixing. The painting looks very beautiful due to mixture of various colours but the painter has to be creative and imaginative. | 2 |
| (ii) | नवरसs are the nine poetic sentiment that an artist generates through his emotions, writing. As proportion of images is necessary for beautiful picture likewise those images should reflect the emotions. The नवरस i.e. nine poetic sentiments like शृङ्गार, वीर, करुण etc. should be present in the picture which makes the picture vibrant. It appears very real. These emotions should be drawn by various postures and gestures of body. Such a picture becomes effective and impressive. | 2 |
| (iii) | डॉ. बाबासाहेब आंबेडकर was fond of Sanskrit language. He also knew the importance of Sanskrit which was the language of the gods and wanted to give it the status of national language. Pertaining to this proposal, a discussion took place in the Parliament wherein Heb. लक्ष्मीकान्त मैत्र asked him few doubts in Sanskrit to test his knowledge of Sanskrit. डॉ. बाबासाहेब आंबेडकर replied in Sanskrit itself. All members were surprised to listen to that conversation. | 2 |
| (iv) | In order to prepare the draft of Indian Constitution, डॉ. बाबासाहेब आंबेडकर had gone through all possible treatises, scriptures. He also knew the importance of literature produced by scholars in Sanskrit. He firmly believed that Sanskrit is the origin of Indian culture. He also studied स्मृतिग्रंथे of मनु, भारद्वाज, याज्ञवल्क्य. He also had discussions | 2 |

with scholars. Having understood this socio-cultural, political ethos in India, he prepared the draft of the Indian Constitution with inclusion of statutes to women and Dalits.

**A.VII. Complete the story.**

अस्ति हेमाङ्गदे देशे राजपुरं नाम **नगरम्** । तत्र जीवंधरो नाम कोऽपि **दयाशीलो** राजपुत्रोऽभवत् । एकदा प्रवृत्ते मधुमासे जीवंधरकुमारः **वयस्यैः** सह जलक्रीडां कर्तुं नदीं गतः । तत्र आसन्नमरणः कोऽपि **कुक्कुरः** तस्य दृष्टिमागतः । केनापि **निर्दयेन** भृशं ताडितः सः रुधिरप्लावितः तत्र पतितः करुणं आक्रोशति स्म । भूतानुकम्पी राजकुमारः बहु दुःखितः । 5

**OR**

**Make *any five* sentences in Sanskrit by using indeclinables / governing cases :**

(i) अलं **कोपेन** । 1

(ii) **वृक्षस्य उपरि** वानरः तिष्ठति । 1

(iii) **नगरात् बहिः** महाविद्यालयः अस्ति । 1

(iv) **श्रीगणेशाय नमः** । 1

(v) अध्यापकः **छात्रेषु स्निह्यति** । 1

(vi) माता **बालकाय** कथां **कथयति** । 1

(vii) सिंह **गुहां प्रविशति** । 1

(viii) बालिका **पाठशालां** गच्छति । 1

**A.VIII. Solve *any five* sub-questions from the following :**

**(A) Recognize *any three* of the following forms :**

(i) स्रोतांसि - स्रोतस् noun ending in स्
Neuter gender
Nominative, Accusative, Vocative plural. 1

(ii) सर्वैः - सर्व Third person pronoun
Masculine, Neuter gender
Instrumental plural. 1

(iii) निर्मातुम् - Root निर् + मा (2 PP)
Infinitive of purpose
तुमन्त अव्यय. 1

| | | |
|---|---|---|
| (iv) | पृष्टवान् - Root प्रच्छ् - पृच्छ् (6 PP)<br>Past Active Participle<br>Masculine gender<br>Nominative singular. | 1 |
| (v) | जाने - Root ज्ञा (9 UP) here AP<br>Present tense<br>First person singular. | 1 |
| **(B)** | **Dissolve and name the compounds : (*Any three*)** | |
| (i) | महाप्रयासः - महान् प्रयासः । - कर्मधारय समास । | 1 |
| (ii) | अस्वास्थम् - न स्वास्थ्यम् । - नञ् तत्पुरुष समास । | 1 |
| (iii) | सादरम् - आदरेण सह । - अव्ययीभाव समास । | 1 |
| (iv) | जनप्रमुखम् - जनानां प्रमुखः, तम् । - षष्ठी तत्पुरुष समास । | 1 |
| (v) | शान्तिसुखयोः - शान्तिः च सुखं च, तयोः । - इतरेतर द्वन्द्व समास । | 1 |
| **(C)** | **Dissolve sandhi as following : (*Any three*)** | |
| (i) | विद्युन्निर्मीयते - विद्युत् + निर्मीयते । | 1 |
| (ii) | ददतीति - ददति + इति । | 1 |
| (iii) | अतस्तेन - अतः + तेन । | 1 |
| (iv) | यतोऽस्य - यतः + अस्य । | 1 |
| (v) | देशान्तरादपि - देशान्तरात् + अपि । | 1 |
| **(D)** | **Give Sanskrit antonym of the following words : (*Any three*)** | |
| (i) | शनैः × शीघ्रम् । | 1 |
| (ii) | मोदः × दुःखम्, खिन्नता । | 1 |
| (iii) | निकटे × दूरे । | 1 |
| (iv) | शीतम् × उष्णम् । | 1 |
| (v) | पुरातनम् × नवीनम्, नूतनम् । | 1 |
| **(E)** | **Complete *any three* of the following sentences by choosing the suitable alternative given in the brackets :** | |
| (i) | रुग्णः स्वयमेव **मम** समीपे आगच्छतु । | 1 |
| (ii) | **अवकरात्** जैविकवायुः प्रभवति । | 1 |

| | | |
|---|---|---|
| (iii) | **समुद्रं** निकषा एवाध्युषितं रम्यस्थलम् । | 1 |
| (iv) | **नैके** खगा आगत्य हिमसमये वसन्ति । | 1 |
| (v) | ट्रॉम्बेतारापुरस्थौ **द्वौ** अणुविद्युत्प्रकल्पौ प्रसिद्धौ । | 1 |
| **(F)** | **Do as directed : (*Any three*)** | |
| (i) | राममन्दिरे **अयं** छत्रपतिशिवरायस्य **चित्रं विलेखितवान्** । | 1 |
| (ii) | **यदा सोमशर्मणा पृष्टं आसीत् तदा** अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्। | 1 |
| (iii) | **अहं** कीर्तिकथाः **स्मरामि** । | 1 |
| (iv) | **त्वं** अस्माकं जीर्णकुटीम् **आगच्छ** । | 1 |
| (v) | स **गङ्गातटम् अयात्** । | 1 |

❖❖❖❖